শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ২৭

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ২৭

*অমৃতমথনে কূর্মাৱতারৱর্ণনম্*

দুৰ্ৱাসাসসুরৱনিতাপ্তদিৱ্যমাল্যং
    শক্ৰায স্ৱযমুপদায তত্ৰ ভূযঃ।
নাগেন্দ্ৰপ্ৰতিমৃদিতে শশাপ শক্ৰং
    কা ক্ষান্তিস্তৱদিতরদেৱতাংশজানাম্॥ ১ ॥

শাপেন প্ৰথিতজরেথ নির্জরেন্দ্ৰে
    দেৱেষ্ৱপ্যসুরজিতেষু নিষ্প্ৰভেষু।
শৰ্ৱাদ্যাঃ কমলজমেত্য সৰ্ৱদেৱা
    নিৰ্ৱাণপ্ৰভৱ সমং ভৱন্তমাপুঃ॥ ২ ॥

ব্ৰহ্মাদ্যৈঃ স্তুতমহিমা চিরং তদানীং
    প্ৰাদুষ্ষন্ ৱরদ পুরঃ পরেণ ধাম্না।
হে দেৱা দিতিজকুলৈৰ্ৱিধায সন্ধিং
    পীযূষং পরিমথতেতি পর্যশাস্তৱম্॥ ৩ ॥

সন্ধানং কৃতৱতি দানৱৈঃ সুরৌঘে
    মন্থানং নযতি মদেন মন্দরাদ্ৰিম্।
ভ্ৰষ্টেস্মিন্ বদরমিৱোদ্ৱহন্ খগেন্দ্ৰে
    সদ্যস্তৱং ৱিনিহিতৱান্ পযঃপযোধৌ॥ ৪ ॥

আধায দ্ৰুতমথ ৱাসুকিং ৱরত্ৰাং
    পাথোধৌ ৱিনিহিতসৰ্ৱবীজজালে।
প্ৰারব্ধে মথনৱিধৌ সুরাসুরৈস্তৈ-
    ৰ্ৱ্যাজাত্ত্বং ভুজগমুখেকরোসসুরারীন্॥ ৫ ॥

www.prapatti.com

ক্ষুব্ধাদ্ৰৌ ক্ষুভিতজলোদরে তদানীং
দুগ্ধাব্ধৌ গুরুতরভারতো নিমগ্নে।
দেৱেষু ৱ্যথিততমেষু তৎপ্ৰিয়ৈষী
প্ৰাণৈষীঃ কমঠতনুং কঠোরপৃষ্ঠাম্॥ ৬ ॥

ৱজ্ৰাতিস্থিরতরকৰ্পরেণ ৱিষ্ণো
ৱিস্তারাৎপরিগতলক্ষযোজনেন।
অম্ভোধেঃ কুহরগতেন ৱৰ্ষ্মণা ত্বং
নিৰ্মগ্নং ক্ষিতিধরনাথমুন্নিনেথ॥ ৭ ॥

উন্মগ্নে ঝটিতি তদা ধরাধরেন্দ্ৰে
নিৰ্মেথুৰ্দৃঢমিহ সম্মদেন সৰ্বে।
আৱিশ্য দ্বিতয়গণেপি সৰ্পরাজে
বৈৱশ্যং পরিশময়ন্নৱীৱৃধস্তান্॥ ৮ ॥

উদ্দামভ্ৰমণজৱোন্নমদ্গিরীন্দ্ৰ-
ন্যস্তৈকস্থিরতরহস্তপঙ্কজং ত্বাম্।
অভ্ৰান্তে ৱিধিগিরিশাদয়ঃ প্ৰমোদা-
দুদ্ভ্ৰান্তা নুনুৱুরুপাত্তপুষ্পৱৰ্ষাঃ॥ ৯ ॥

দৈত্যৌঘে ভুজগমুখানিলেন তপ্তে
তেনৈৱ ত্ৰিদশকুলেপি কিঞ্চিদাৰ্তে।
কারুণ্যাত্তৱ কিল দেৱ ৱারিৱাহাঃ
প্ৰাৱৰ্ষন্নমরগণান্ন দৈত্যসঙ্ঘান্॥ ১০ ॥

উদ্ভ্ৰাম্যদ্বহুতিমিনক্ৰচক্ৰৱালে
তত্ৰাব্ধৌ চিরমথিতেপি নিৰ্ৱিকারে।
একস্ত্বং করযুগকৃষ্টসৰ্পরাজঃ
সংরাজন্ পৱনপুরেশ পাহি রোগাৎ॥ ১১ ॥

**********


www.prapatti.com